M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 120

Title: Brahmottara Khanda

(Skanda Puran)

Patra

120

Incomplete

		Brahmottara Khanda	Title
		of Skanda Purana	Author
			Editor
			Year, Vols.
			Publisher
120		Begins abruptly	Remarks

भवकोटिशतोत्पन्नपुण्यराशिविपाकतः॥ लभतेवासुनस्तत्रबिल्व
पत्रार्चनंविष्णोः॥ वर्षाणामयुतंयेनस्नानंगंगासरिज्जले॥ सकृ
त्बिल्वार्चनेनैवतत्फलंलभतेनरः॥ यानिकानिचपुण्यानिकृता
नीहयुगेयुगे॥ माघासितचतुर्दश्यतानितिष्ठंतिकृत्स्नशः॥
एतामेवप्रशंसंतिलोकेब्रह्मादयःसुराः॥ मुनयश्चवसिष्ठाद्यामा
घासितचतुर्दशीं॥ अत्रोपवासःकेनापिकृतःक्रतुशतायने॥ रा
त्रौजागरणंपुण्यंकल्पकोटितपोधिकं॥ एकेनबिल्वपत्रेणशिव
लिंगार्चनंकृतं॥ त्रैलोक्येतस्यपुण्यस्यकोपासादृश्यतेष्यति॥
अत्रानुवर्ण्यतेगाथापुण्यांपरमशोभना॥ गोपनीयापिकारु

ब्रह्मो ण्याद्योतमो ७ नप्रकाशिता ॥ ईक्ष्वाकुवंशजः श्रीमान्राजा परमधार्मिकः ॥
७ आसिन्मित्रसहो नाम श्रेष्ठः सर्वधनुष्मतां ॥ स राजा सकलार्थज्ञः श्रुति
पारगः ॥ वीरोनंतबलोत्साहो नित्योद्योगी दयानिधिः ॥ पुण्यानामि
वसंघातः तेजसामिव पंजरः ॥ आश्रयाणामिव क्षेत्रं पंजरः ॥ वयस्य मूर्ति
र्विराजते ॥ हृदयं दयया क्रांतं श्रिया क्रांतं च यद्वपुः ॥ चरणौ यस्य सामंत
चूडामणिमरीचिभिः ॥ एकदा मृगयायां वै लोलुपः स महीपतिः ॥ वि
वेश गहनं घोरं बलेशो नमहताहतः ॥ तत्र विव्याध विशिखैः शार्दूला
न्गवयान्मृगान् ॥ रुरून्वराहान्महिषान्मृगेंद्रान्पिष्टरिशा ॥
स रथी मृगया सक्तो गहने दंवित्तम्बरन् ॥ कमपि ज्वलनाकारं नि ७

उद्यान निशाचरं ॥ तस्यानुजो भयाद्विष्टोदृष्ट्वा दूरे तिरोहितः ॥ भ्रातरं तं निहतं दृष्ट्वा चिं
तयामास चेतसा ॥ अहोरवल्वेषदुर्धर्षो देवानां रक्षसामपि ॥ छद्मनैव प्रजेन
व्याममशत्रुर्न चान्यथा ॥ इति व्यवसितः पापो राक्षसो मानुषाकृतिः ॥ आ
ससाद नृपश्रेष्ठमुत्पातइव मूर्त्तिमान् ॥ अथ तस्मिन्वने राजा किंचित्काल
विहृतसः ॥ निवृत्तो मृगयां हित्वा स्वपुरं पुनरायये ॥ तस्य राजेंद्रमुख्य
स्य मदयंतीति नामतः ॥ दमयंती नलस्येव विदिता पत्नी बभासती ॥ ततो
स्मिन्समये राजा निमंत्र्य मुनिपुंगवं ॥ वसिष्ठं गृह मानिन्ये संप्राप्ते पि
तृवासरे ॥ रक्षसा सूददरूपेण संमिश्रित नरामिषं ॥ शाकामिषं पुरः
क्षिप्तं दृष्ट्वा गुरुरथाब्रवीत् ॥ धिग्धिग्नरामिषं राजन्त्वयैतच्छद्मकौ
रिप्या ॥ छलेनोपहृतं मेद्य अतो रक्षो भविष्यति ॥ पुनर्विमृश्य तं

शापंचकारद्वादशाब्दिकं ॥ राजापिकोपितः प्राहयदिदंमेनिचेष्टितं ॥
पतित्वापादयोस्तस्यमदयंतीन्यवारयत् ॥ नज्ञातंचरथाशप्तोर
गुरुश्चैवशपाम्यहं ॥ इत्यपोंजलिमादायगुरुंशप्तुंसमुद्यतं ॥ ततो
निरस्तःशापाश्चैवतस्यावचनगौरवात् ॥ पपातपादयोरंभःपादौ
कल्मषतांगतौ ॥ कल्मषांघ्रिरितिख्यातस्ततःप्रभृतिपार्थिवः ॥
बभूवगुरुशापेनराक्षसोवनगोचरः ॥ सबिभ्रद्राक्षसंरूपंकालां
तकोपमं ॥ चखादविविधाञ्जंतून्मानुषादीन्वनेचरः ॥ सकदा
चिद्वनेकापिरममाणौकिशोरकौ ॥ अपश्यदंतकाकारोनवोढौमुनि
दंपती ॥ राक्षसोमानुषाहारःकिशोरंमुनिपुंगवं ॥ जग्धुंजग्राहशा
पार्त्तोव्याघ्रोमृगशिशुंयथा ॥ कक्षेगृहीतंभर्त्तारंदृष्ट्वाभीयतःप्रि

या ॥ उवाचकरुणंबालारुदतीभृशदुःखिता ॥ भोभोमाभाकथाःपापंसूर्य
वंशयशोधर ॥ मदयंतीपतिस्त्वंहिराजेंद्रोनतुराक्षसः ॥ नखादमम
भर्त्तारंप्राणप्रियतरंप्रभो ॥ आर्त्तानांशरण्यानांत्वमेवहियतोगतिः ॥
पापानामिवसंघातैःकिंमेदुष्टैर्दुरात्मभिः ॥ देहेनचानिभारेणविना
भर्त्रामहात्मना ॥ बालोयंवेदविच्छांतस्तपस्वीबहुशास्त्रवित् ॥ अ
तोस्यप्राणदानेनजगद्रक्षाकृताभवेत् ॥ कृपांकुरुमहाराजबालो
मोब्राह्मणास्त्रियां ॥ अनाथांकृपणेतेषुसघृणाःखलुसाधवः ॥
इत्यमभ्यर्थ्यमानोपिपुरुषादःसनिर्घृणः ॥ चखादशिरउत्कृ
त्यविप्रपुत्रंदुराशयः ॥ अथसाध्वीकृशादीनाविलप्यभृशदुः

ब्र॰ खं

९

॥रवीता॥आहृत्यभर्त्तुरस्थीनिचितांचक्रेयथोल्बणं॥भर्त्तारमनुग
च्छंतिसंविशंतीहुताशनं॥राजानंराक्षसाकारंशापास्त्रेणजघा
नतं॥रेरेपार्थिवपापस्त्वंत्वयामेभक्षितःपती॥अतःपतिव्रताया
स्त्वंशापंभुंक्ष्वयथोल्बणं॥अद्यप्रभृतिनारीषुयदात्वमपिसंग
तः॥तदामृत्युस्तवेत्क।विवशात्वंनसती॥सोपीराजागु
रोःशापमनुगृह्यकृतावधिः॥पुनःस्वंरूपमास्थायस्वगृहं
मुदितोऽययौ॥ज्ञात्वाविप्रसतीशापंमदयंतीरतीप्रियं॥पतिं
निवारयामासवैधव्याद्दविबिभ्यती॥अनपत्यःसनि
र्विण्णाराज्यभोगेषुपार्थिवः॥विसृज्यसकलांलक्ष्मीं

ययोभूयोपिकाननं॥सूर्यवंशप्रतिष्ठित्यैवसिष्ठोमुनिसत्तमः॥त
स्यामुत्पादयामासमदयंत्यांसुतोत्तमं॥विसृष्टराज्योराजापि
विचरन्सकलांमहीं॥आयातिस्पृष्टतापश्यत्पिशाचिंघोररूपि
णीं॥सायमूर्तिमतीघोराब्रह्महत्यादुरत्यया॥यदासौश
पविवशो॥मुनिपुत्रमभक्षयत्॥तेनास्मकर्मणायातांब्रह्म
हत्यांसपृष्टतः॥बुबुधेमुनिवर्याणामुपदेशोनष्टपतिः॥त
स्यानिर्वेदमन्विष्यन्राजानिर्विण्णमानसः॥नानाक्षेत्रा
णिसर्वाणिचचारबहुवत्सरं॥यदातीर्थेषुसर्वेषुस्नात्वा
पिचमुहुर्मुहुः॥नाविरत्ताब्रह्महत्याभिथिलायांययोतदा॥

बाह्योद्यानगतस्याश्चिंतयापरयार्दिताः ॥ ददर्शमुनिमायांतंगोतमंवि
१० मलाशयं ॥ हुताशनमिवाशेषतपस्विजनसेवितं ॥ विवस्वंतमिवोद्यंतं
घनदोषतमोनुदं ॥ शशांकमिवनिःशंकमवदातगुणोदयं ॥ महेश्व
मिवश्रीमद्द्विजराजैककलाधरं ॥ शांतंशिष्यगुणोपेतंतपसामेकभाजनं ॥
३ अथस्पृश्यसराजेंद्रः प्रणनाममुहुर्मुहुः ॥ गोतमोपिमुनिश्रेष्ठोराजा
नंरविवंशजं ॥ अभिनंद्यमुनिः प्रीत्यासस्मितंसमभाषत ॥ ॥
॥ ॥ गोतमउवाच ॥ ॥ कच्चित्तेकुशलंराजन्स्कच्चिदव्याहतंपदं ॥
कुशलिन्यः प्रजाः कच्चिदवरोधजनोपिवा ॥ किमर्थमिहसंप्रा १०
सोविसृज्यसकलांश्रियं ॥ किंवध्यायसिभोराजन्दीर्घमु

ष्णंचनिःश्वसन् ॥ ॥ राजोवाच ॥ ॥ सर्वेकुशलिनोब्रह्मन्वयंत्व
दनुकंपया ॥ राज्ञामुत्तमवंश्यानांब्रह्मायत्ताहिसंपदः ॥ किंतुमां
बाध्यतेह्येषापिशाचीघोररूपिणी ॥ अलक्षितायदपरैर्भर्त्सयं
तीपदेपदे ॥ यन्मयाशापदग्धेनकृतमंहोद्धरत्ययं ॥ नशांतिर्जा
यतेतस्यप्रायश्चित्तसहस्रकैः ॥ इष्टाश्चविविधायज्ञाः कोश
सर्वस्वदक्षिणाः ॥ सरित्सरांसिस्नातानियानिपूज्यानिभू
तले ॥ निषेवितानिसर्वाणिक्षेत्राणिभ्रमतामया ॥ जप्ता
न्यखिलमंत्राश्चध्याताःरिवैसकलदेवताः ॥ मयाचव्रतानि
चीर्णानिपर्णमूलफलाशिना ॥ तानिसर्वाणिकुर्वंतिस्वछंमां
नकादाचन ॥ अथमेजन्मसाफल्यंसंप्राप्तमिवलक्ष्यते ॥

११ यस्यसंदर्शनादेवममात्मानंदभागभूत्॥आन्विछंन्नलभतेकापिव
वर्षकूगेर्मनोरथं॥इत्ययंजनवादोपिसंप्राप्तोमयिसत्यतां॥आज
न्मसंचितानांतुपुण्यानामुदयोद्यमे॥यद्भवान्भवभीतानांत्राता
नयनगोचरः॥कस्माद्देशादिहायातोभवान्भुवभयापहः॥
दूरभ्रमणविश्रांतंशंकेत्वामिहचागतंद्धवाश्चर्यभिवात्यर्थंमु
दितोसिसुखश्रिया॥आनंदयसिमेचेतःप्रेणणासंभाषणा
दिना॥अथमेतवपादाब्जशरणास्यधतैनसः॥शांतिंकुरुमहाभा ११
गयेनाहंस्तुखमाप्नुयां॥इतिमैनंतेनसमादिष्टोगोतमःकरु

णानिधिः॥समादिदेशघोराणामघानांसाधुनिष्कृतिं॥ ॥गौतमः॥
साधुराजेंद्रधन्योसिपातकेभ्यायंत्सज॥शिवेंत्रातारिमाक्तानांकु
मयंशरणेषिणां॥श्रृणुराजन्माहाभाक्षेत्रमन्यत्प्रतिष्ठितं॥महापा
तकसंहारीगोकर्णाख्यंमनोरमं॥यत्रास्थितिर्नपापानांमहद्भ्योमहतामपि॥
स्मृतोविशेषपापघ्नोयत्रसंन्निहितःशिवः॥यथाकैलासशिखरेयथा
मंदरमूर्धनि॥निवासोनिश्चितंशंभोस्तथागोकर्णमंडले॥नाग्निनान
शशांकेननताराग्रहनायकैः॥तमोविशीर्यतेसम्यग्यथासविल्ददर्श
नात्॥नथैकैवनतैरस्तीर्थैर्नचक्षेत्रैमनोरमैः॥सकलस्यविश्वस्यगोकर्णे
नबिभेतियमादपि॥तत्रपूर्वंवैमहात्मानस्तपसासिद्धिमागतः॥इं

श्लो.
२२ द्रोपेंद्रविरिंच्याद्यैः सेव्यते मुक्तिकांक्षिभिः ॥ तत्रैकेन दिनेनापि यत्कृतं व्रत
मुत्तमं ॥ तदन्यत्राष्टलक्षेण तपस्तदतिसंभवं ॥ यत्रेंद्रब्रह्मविष्ण्वादितदेवानां हित
काम्यया ॥ माहाबलाभिधानेन देवः सन्निहितः स्वयं ॥ घोरेण तपसासौ
लब्धं रावणाख्येन राक्षसा ॥ तं लिंगं स्थापयामास गोकर्णे गणनाय
का ॥ इंद्रो ब्रह्मा मुकुंदश्च विश्वेदेवा मरुद्गणाः ॥ आदित्या वसवो रुद्राः
शशांकश्च सतारकः ॥ एते विमानग॰ तयो देवास्तु सह पार्षदैः ॥ पूर्वद्वा श्रीः
रि निषेवंते तस्यैव प्रीतिकारणात् ॥ कालो मृत्युः स्वयं साक्षाच्चित्रगु
पाव प्तश्च कौणकः ॥ पितृभिः सह रुद्रैश्च दक्षिणद्वारमाश्रिताः ॥ वरुणः २२
सरितां नाथो गंगादिसरितां गणैः ॥ मूर्त्तिमांस्तयासिध्यैः

यः सा
पश्चिमद्वारमासितः ॥ तथैव मुनयः साध्या अजिनांबरधारिणः ॥ दांडिनो व्रति
मुंडाश्च स्नातकव्रतचारिणः ॥ सर्वेदेवेदवेधिनाकिनं ॥ सेवंते च तथा यक्षा ह्यु
त्तरद्वारमाश्रिताः ॥ तथा देवाः सगंधर्वाः परितः सिद्धचारणाः ॥ विद्याध
राः किंपुरुषा गुह्यकाः किन्नराः खगाः ॥ नागाः पिशाचा वेतालादैतेया
श्च महाबलाः ॥ नानाविधवसंपन्ना नानाभूषणवाहनाः ॥ विमानैः सूर्य
संकाशै रश्मिवर्णैः शशिप्रभैः ॥ विद्युत्पुंजनिभैरन्यैः समंतात्परि
वार्यते ॥ प्रस्तुवंति च गायंति समंतात्प्रणमंति च ॥ प्रनृत्यंति प्रहृष्यंति
गोकर्णे पृथिवीपते ॥ लभंते भीसितान्कामान्सकलान्हि मनोरथा
न् ॥ गोकर्णसदृशं क्षेत्रं नास्ति नास्ति जगत्त्रये ॥ तत्र घोरं तपस्त

समगस्त्येनमहात्मना॥ तथासनत्कुमारेणप्रियव्रतसुतैरपि॥ अग्नि
नादेववर्येणकंदर्पेणचभ्रः पार्थिव॥ तथादेव्याभिद्रेमेकाल्याशिशुमा
रेणाधिभत॥ दुर्मुखेनफणींद्रेणमणिनागाढ्येनच॥ इलावर्त्तादि
भिर्नागेर्गरुडेनमहात्मना॥ राक्षसारावणेनापिकुंभकर्णाढ्येनच॥
वीभिषणेनपुण्येनतपस्तप्तंमहात्मना॥ एतेचान्येचगीर्वाणाः॥ ध
सिद्धदानवमानवाः॥ गोकर्णेदेवदेवेशंशिवमाराध्यभक्तितः॥ स्व
नामांकानिलिंगानिस्थापयित्वासहस्रशः॥ लेभिरेपरमांसिद्धिं
तथातिर्थानिचक्रिरे॥ अतः स्थानानिसर्वेषांदेवानांसंतिपार्थि
व॥ विष्णोश्चदेवदेवस्यब्रह्मणः परमेष्ठिनः॥ कार्त्तिकेयस्य

दी
गजवक्त्रस्यचानघ॥ धर्मस्यक्षेत्रपालस्यदुर्गायाश्चमहामने॥ गोकर्णेशि
वलिंगानिविद्यंतेकिलकोटिशः॥ असंख्यानितीर्थानिविद्यंतेचपदेपदे॥
बहुनात्रकिमुक्तेनगोकर्णस्थानमुत्तमं॥ ब्रह्महत्यादिपापानिदहतीतिमे
किमद्भुतंसर्वपक्षाहिलिंगानितीर्थान्यंभांसिसर्वशः॥ वर्ण्यतेचपुरारा
जन्पुराणेचमहर्षिभिः॥ गोकर्णेकोटितीर्थेतीर्थानांमुख्यतांगतं॥ सर्वे
षांशिवलिंगानांसार्वभौमोमहाबलः॥ कृतेमहाबलःश्वेतस्त्रेतायामपि
लोहितः॥ द्वापरेपीतवर्णश्चकलौश्यामोभविष्यति॥ आक्रांतसप्तपा
तालःकुहरश्चमहाबलः॥ प्राप्तेकलियुगेघोरेमृदुतामुपयास्यति॥ प
श्चिमांबुधितीरस्थंगोकर्णंतीर्थमुत्तमं॥ ब्रह्महत्यादिपापानिदहतीति

येसर्वगुणहीनाश्च
किमद्भुतं॥ येचात्रपितृहंतारोतथामित्रद्रुहः शठाः॥ येसर्वगुणहीनाश्च
२४ परदाररताश्चये॥ येदुर्वृत्तादुराचारादुःशीलाःकृपणाश्चये॥ लुब्धाः
क्रुद्धाः खलाःशठारतेनाश्चैवापिपापिनः॥ तेसर्वेप्राप्यगोकर्णंस्नात्वा
तीर्थजलेषुच॥ दृष्ट्वेमाहाबलंहत्वापापानाः शांकरंपदं॥ तत्रपुण्यासु
तीर्थेषुपुण्यक्षेत्रेपुण्यवासरे॥ येयेयेतिमहात्मानंतेरुद्रास्तुनेसं
शयः॥ यदाकदापिगोकर्णंयोवाकोपिमानवः॥ प्रविश्यपूजयेदी
शंसगच्छेद्ब्रह्मणःपदं॥ रवींदुसौम्यवारेषुयदादर्शोभविष्यति॥ २४
तदाजलनिधौस्नानंदानंचपितृतर्पणं॥ शिवपूजाजपोहोमोव्रतंच
यत्द्विजार्चनं॥ यत्किंचिद्वाकृतंकर्मतदनंतफलंस्मृतं॥ व्यतीपाता

दियोगेषुरविसंक्रमणेषुच॥ सदाप्रदोषवेलायांशिवपूजाविमुक्तिदा॥ अथकांते
प्रवक्ष्यामितिथिंपार्थिवमुक्तिदां॥ यस्यांकिलमहाव्याघ्रोलेभेशंभोः परंपदं॥
माघमासेमहापुण्यायासाकृष्णचतुर्दशी॥ शिवलिंगंबिल्वपत्रंदुर्लभंहितुत
ष्टयं॥ अहोबलवतीमायायथाशैवीमहातिथिः॥ नोपास्यतेजागरणेमहा
मुक्तैरिवत्रयी॥ उपवासोजागरणंसन्निधिःपरमेशितुः॥ गोकर्णेशिवलो
कस्यतूर्णंसोपानपद्धतिः॥ श्रृणुराजन्नहमपिगोकर्णादद्यधुनागतः॥ उ
का पास्येनांशिवतिथिंविलोक्यमहोत्सवं॥ अस्यांशिवतिथौसर्वेमहोत्स
वदिदृक्षवः॥ आगताःसर्वदेशाभ्यश्चातुर्वर्ण्यमहाजनाः॥ स्त्रियोवाबा
लवृद्धाश्चचतुराश्रमवासिनः॥ आगत्यदृष्ट्वादेवेशंलेभिरेललतलसतां॥

ब्र॰खं तथाहमप्यमीशिष्याहृषयश्चतपोधानाः॥ राजर्षयश्च राजेंद्र सनकाद्याः

स्फुरर्षयः॥ स्नातास्सर्वेषुतीर्थेषुसमुपास्यमहाबलं॥ लब्ध्वाचजन्मसाफल्यं

२५ प्रयाताःसर्वतोदिशं॥ प्रत्यागमनेकिमप्यंगदृष्टंआश्चर्यमहंपथि॥ राजा

नंदेनमहताकृतार्थोस्मिमहामते इतिश्रीस्कंदपुराणेब्रह्मोत्तर

खंडेगोकर्णप्रशंसानामद्वितीयोध्यायः॥ योगेशतंत्र

नकृश्टंगमयंददातिविप्रायवेदविदुषेबहुश्रुताय पुण्यांच शिव

भारतकथांशृणुयाच्चनितुल्यंफलंभवतिभवतितस्यचतथ्यमे २५

तत् श्रीः श्रीसदाशिवप्रसन्नोस्तु श्रीः छ छ

श्रीः राजोवाच किंदृष्टंभवताब्रह्मन्नाश्चर्यंपथिकुत्रवा॥ तन्ममाख्या

ह्येनाहंकृतकृत्यत्वमाप्नुयां॥ ॥गौतमोवाच॥ गोकर्णादहमा

गच्छन्कापिदेशेविशांपते ऊनेमध्याह्नसमये दृष्टवान्विमलंसरः

तत्रोपस्पृश्यसलिलंविमलंचश्रमापहं सुस्निग्धशीतलछायंन्यग्रो

धंसमुपाश्रयं अथाविदूरेचांडालींबहुरोगनिपीडितां कुष्ठव्रणप

रीतांगींलुप्तक्रिमिकुलाकुलां पूयशोणितसंसिक्तांक्षरत्पाय

लसत्कटिं॥ महायक्ष्मगकष्टेनकंठसंरोधविह्वलां धिनष्टदं

तमथ्यक्तांविलुंठंतींमुहुर्मुहुः चंडार्ककिरणस्पर्शतीव्रदुःखपी

अ॰ रवं
२६

प्लुतां विण्मूत्रपूयदिग्धांगीअसृग्गंधदुरासदां कफजर्जरश्वासकासश्ल
थनाडींबहुव्यथां विध्वस्तकेशावयवामपश्यन्मरणोन्मुखीं तादृग्व
थांचतांवीक्ष्यकृपयाहंपरिप्लुतः प्रतीक्ष्यमरणंतस्याःक्षणंतत्रैवसंस्थि
तः अथांतरिक्षपदवींसिंचंतमिवरश्मिभिः दिव्यंविमानमानीत
मद्राक्षंशिवकिंकरैः तस्मिन्रवींदुवह्नीनां तेजसामिवपंजरान्
विमानेसूर्यसंकाशान्अपश्यंशिवकिंकरान् तेचैत्रिशूलखट्वां २६
गटंकचर्मासिपाणयः चंद्रार्धभूषणाःसांद्रचंद्रकुंदोरुवर्चसः
किरीटकुंडलभ्राजन्महार्हवलयोज्वलाः शिवानुगामयादृष्टा

चत्वारःशुभलक्षणाः तानापततमालोक्य विमानस्थान्सुविस्मि
ताः उपसृत्यांतिकं कवेगादपृच्छंमनसिस्थितान् नमोनमोवः
त्रिदशोत्तमेभ्यो त्रिलोचनश्रीचरणानुगेभ्यः त्रिलोकरक्षाविधिना
चरेभ्यस्त्रिशूलचर्मासिगदाधरेभ्यः वीक्षिताःस्ताहि मयायूयंमहे
श्वरपदानुगाः चरतोलोकरक्षार्थमसिरक्षाविनोदकाः अहो
सर्वज्ञनाथोपदिष्टयायकृतोद्यमाः कृतकारुण्यतोम्हस्यंयस्मा
द्यूयमिहागताः॥शिवदूताऊचुः॥ ॥एषाग्रेहस्पतेरद्दुराचांगकी
मरणोन्मुखी एतामानेतुमायाताः संदिष्टाःशंभुनावयम्

ब्र॰ इत्युक्ताः शिवदूतैस्तैः पप्रच्छुः पुरुषा ह्यहं विस्मयाविष्टचित्तास्ते कृतांजलि
१७ खलिनः अहो पापीयसी घोरा चांडाली कथमर्हति दिव्यं विमानमा
रोढुं शुनीवाध्वरमंडपं आजन्मतोशुचिप्रायां पापां पापानुगामिनीं
कथमेतां दुराचारां शिवलोकं विनेष्यथ अस्यां नास्ति शिवज्ञानं
नास्ति घोरतरं तपः सत्यं नास्ति दया नास्ति कथमेनां विनेष्यथ
पशुमांसकृताहारां वारुणीपूरितोदरां जीवहिंसारतां नित्यं कथमे
नां विनेष्यथ न च पंचाक्षरीजप्ता न कृतं लिंगपूजनं न ध्यातो भग १७
वान्शंभुः कथमेनां विनेष्यथ नोपोषिता शिवतिथिर्न कृतं व्रतसौ

हृदं इष्टापूर्तादिकं वापि कथमेतां विनेष्यथ न च स्नातानि तीर्थानि
न दानानि कृतानि ह न च व्रतानि चीर्णानि कथमेनां विनेष्यथ॥
जन्मांतरार्जितं किंचिदस्याः सुकृतमस्ति वा तत्कथं कुष्ठयक्ष्मेणाक्रि
भिभिः परिक्षयते दर्शने परिहर्तव्या किमु संभाषणादिषु सत्संग
रहितां चंडां कथमेनां विनेष्यथ अहो शंकरसेवायां दुर्विज्ञेया यथाशि
वा पापात्मनोपि विंदंते कारुण्यात्परसंपदं इत्युक्तास्ते मया
दूता देवदेवस्य शूलिनः अब्रुवन्परमप्रीतास्तस्याः कृत्यं तमद्भुतं
शिवदूता ऊचुः ब्रह्मन्सुमहदाश्चर्यं शृणु कौतूहलं यदि

द्वि. खं.
इमामुद्दिश्यचांडालीयदुक्तंभवताधुना आसीदियंपूर्वभवेस्थेकाब्राह्मण
२८ कन्यका सोमित्रानामसंपूर्णचंद्रबिंबसमानना उत्फुल्लमल्लिकादामसुकु
मारांगलक्षणा केकेयद्विजमुख्यस्यकस्यचित्तनयासती। तांसर्वलक्षणो
पेतांरतेर्मूर्तिमिवापरां वर्द्धमानांपितुर्गेहेवीक्ष्यतंविस्मिताजनाः दिने
दिनेवर्धमानाबंधुभिर्लालिताभृशं साशनैर्यौवनंभेजे स्मरस्येवम
हाधनुः पित्रामात्राबंधुवर्गैः समेतैश्चकुमारिका विचार्यदत्ताविधिना
कस्मैचिद्द्विजसूनवे साभर्तारमनुप्राप्यनवयौवनशालिनी किंचित्का २८
लंशुभाचारारेमेबंधुभिरादृता अथकालवशात्तस्याभर्तातीव्ररुजार्दि
तः रूपयौवनकांतोपिसपंचत्वमगमन्मुने मृतेभर्तरिदुःखेनादग्धहृदयासती

उवासकतिचिन्मासान्सुशीलाविजितेंद्रिया अथयौवनभारेणजृंभमाणेननि
त्यशः बलवद्दह्यमानंतस्याःकंदर्पपरिपीडितं सुगुप्ताबंधुवर्गेणशासितापिम
हत्तमैः नशशाकमनोरोद्धुं मदनार्त्तमंगना सातीव्रमन्मथाकृष्टारूपयौव
नशालिनी विधवापिविशेषेणजारमार्गरताभवत् नज्ञाताकेनचिदपि
जारमार्गविचक्षणा जुगोपात्मदुराचारंकंचित्कालंसुसंवृता तांदोहदस
माक्रांतांघननीलकुचस्तनीं कालेनबंधुवर्गोपिबुबुधेविटदूषिताम्
इतिभीतोमहत्क्लेशाच्चिंतयामासदुःखितः स्त्रियःकामेननश्यंतिब्राह्मणा
हीनसेवया राजानोब्रह्मदंडेनयतयोभोगसंग्रहात् लीढंश्वनायथैवा
न्नंसुरयेवार्पितंपयः रूपंकुष्ठरुजाविष्टंकुलंनश्यतिकुस्त्रिया इतिसर्वे

श्र॰ खं॰ समालोच्यमीलिताःपतिसोदराःतस्यगोचरतोदूरंनीत्वातांसकन्ययहस्त
२९ स्वदेशाद्दूरमत्सृष्टासानारीसर्वबंधुभिःविसृष्टाबाह्यग्रामाद्दृष्टाशूद्रेणकेन
चित् सतीहृष्टावरारोहांपीनोन्नतपयोधरां गृहंनिनायसाम्नासधनवान्
शूद्रनायकः सानारीतस्यमहिषीभूत्वातेनादिवानिशं रममाणाक्वचिद्देशा
न्यवसद्गृहवल्लभा तत्रसापिशिताहाराभिसमापीनवारुणी लेभेसुता
न्सशूद्रेणरममाणारतिप्रिया कदाचिद्भर्तरिक्वापियातेपीतसुरासवा
स्येषपिशिताहारंमदिरामदविह्वला अथमेषपुबुद्धेषुगोभिःगोभिःस श्री॰
ह बहिर्व्रजे यष्टीकृपाणमादायसातमोंधा निशामुखे अविमृश्यम २९
दाविष्टामेषबुध्यारतिप्रिया एकंउपानगोवत्संदुर्भगामदविह्वला

निहत्यगृहमानीयज्ञात्वागोवत्समंगना भीताशिवशिवेत्याहकेनचित्पुण्य
कर्मणा सामुहूर्तंविध्यात्वापिशितासवविह्वला छित्वातंमवगोवत्सं
चकाराहरमीप्सितं गोवत्सार्द्धशरीरेणकृताहाराथसापुनः तदर्द्धंदेहं
निक्षिप्यबहिश्चुक्रोशकैतवात् अहोव्याघ्रेणभग्नोयंजग्धोगोवत्सको
व्रजे इतितस्याःसमाक्रोशंसर्वगेहेषुशुश्रुवे ततःसर्वेशूद्रजनाःस
माक्रम्यांतिकेस्थिताः हतंगोवत्समालोक्यव्याघ्रेणेतिशुचंययुः गते
षुतेषुसर्वेषुव्युष्टायांचतमोनिशि तद्भर्तागृहमागत्यददृष्टवान्गृहद्विडु
रं एवंबहुतिथेकालेगतेसाशूद्रवल्लभा कालस्यवशमापन्नागोजे
मयममंदिरं यमोपिधर्ममालोक्यतस्याःकर्मचपौर्विकं निर्वर्त्यनिर

शि. याबासंचक्रे चांडालजातिकां साविभ्रष्टायमपुरा च्चांडाली गर्भमाश्रिता
२० ततो बभूव जात्यंधा प्रशातागारसेचका तां तादृशीमपि सुचांडाल: पय
अभोज्येन कदन्नेन शुनालीढेन पूतिना। अपेयैश्चरसैर्माता पोषिता सा
दिने दिने जात्यंधा सापि कालेन बाल्ये। नापि रूढा गृहीता उद्वाहनं केनापि
दापि चांडालेनाति दुर्भगा। अतीव बाल्ये सा नारी विध्वस्त पितृमातृ
का दुर्भगेति परित्यक्ता बंधुभिश्च सहोदरैः। अथ क्षुधार्दिता दीना
शोचंती विगतेक्षणा। गृहीतयष्टिः कृच्छ्रेण संचचार सलोष्टका पथ्य २०
नेषपि सर्वेषु याचमाना दिने दिने चांडालोच्छिष्टपिंडेन जठराग्नि
मतर्पयत् एवं कृच्छ्रेण महता नीतास्तु बहुला: समा: जरयाग्रस्तस

रोगी दुःखमापदुरत्ययं। निरन्नपानवसना साक दाचिन्महजनान्
उपास्यतां शिवतिथिं बुबुधे वदतोध्वगान् तस्यां तु देवयात्रायां देशाद्
शांतरायिनां विप्राणां साग्निहोत्राणां सस्त्रीकाणां महात्मनां राज्ञा
चसावरोधानां सहस्तिरथवाजिनां सपरीवारघोषाणां यानछात्रो
पशोभिनां तथान्येषां च चतुर्दशहूद संकीर्णानां सहस्त्रशः हसतां गाय
तां कापि नृसतामनुधावतां संप्रयाणे मनुष्याणां संभ्रमः सुमहानभू
त् इति सर्वेषु गच्छत्सु गोकर्णे शिवमंदिरं गच्छंति दिविजाः सर्वे वि
मानरूढा: सकौतुका: अथेयमपि चांडाली वसनाशनतृष्णया

महाजनान्याचयितुं संचचाल शनैः शनैः करावलंबेनान्यस्य प्राग्जन्मार्
र्जितकर्मणा दिनैः कतिपयैर्यातिगोकर्णक्षेत्रमाययौ ततो विदूरे मार्गे
स्य निषण्णा शिवरात्रौ याचमानामुहुः पांथान्बभाषे रूपणं वचः
प्राग्जन्मार्जितपापौघैः पीडितायाश्चिरं मम आहारमात्रदानेन द
यां कुरुत भोजनाः चिरोपवाससंतप्तजठराग्निनिवर्तनैः संदह्यमा
नसर्वांग्या दयां कुरुत भोजनाः एवमभ्यर्थयंसास्तत्तंडाल्याः प्रस
तेंजलौ एकः पुण्यतमः पांथः प्राक्षिपद्बिल्वमंजरी। तामंजल्यौ निप
तितां सा विमृश्य पुनः पुनः अभोज्येसेव गम्याशु दूरे प्राक्षिपदातुरा

तस्याः करेण निर्मुक्ता रात्रौ सा बिल्वमंजरी। पपात कस्यचिद्दिष्ट्या शिवलिंगस्य
मस्तके सैवं शिवचतुर्दश्यां पांथान्याचे क्षुधातुरा याचमानापि यत्किंचि
न्नलेभे दैवयोगतः तत्रोषितानपारात्रिर्भद्रकाल्यास्तुपर्वतः किंचिदु
त्तरतस्थानं तदर्धेनानिद्रिरतः ततः प्रभाते भ्रष्टाशा शोकेन महताश्रिता।
शनैर्निवर्तते शांता स्वदेशायैव केवलं श्रांता चिरोपवासेन निपतंती।
पदे पदे क्रंदंती बहुदुःखेगाथतविपमाना क्षुधातुरा दह्यमानांगतापेन
नम्रदेहा सयष्टिका अतीसेतावतीभूमिं निपपात विचेतना अथ
विश्वेश्वरः शंभुः करुणामृतवारिधिः एतामानायितुं तस्मान्नियुक्त

सन्निनायकान् एषाप्रसूतिश्चांडाल्यास्तवेहपरिकीर्तिता यथासंदर्शिता
शंभोः कृपणेषु कृपालुता कर्मणापरिपाकोत्थांगतिंपश्यमहामते
अधर्मोपिपरंस्थानमारूढ्यातिनिरामयं यदेतयापूर्वभवेनान्नदा
नादिकं कृतं क्षुत्पिपासादिकैः क्लेशैः स्तस्मादिहनिपीड्यते यदे
षामदवेगांधात्वकेपापंमहोल्बणं कर्मणातेनजातांधावभूवरा
जन्मजन्मानि अपिविज्ञायगोवत्सं यदेषाभक्षयत्पुरा कर्मणा
तेनचांडाल्याबभूवेहविगर्हिता यदेषार्यपथांहित्वाजारमार्गरता
भवत् तेनपापेनकेनापिनष्टानादुर्भगातिस यदास्छिष्टामहावेगाज्ञा

स्पाविध्यवापुरातेनपापेनमहताबहुकुष्ठव्रणक्षता कामान्धायदियंस्वैरंभ्र
ष्टारमितापुरा महास्तकष्टयक्रीमिभिःपीडितातेनपाप्मना यदेतयापूर्वभवेस्तु
रापीताविमूढ्या महायक्ष्मादिभिर्रोगैःपीड्यतेतेनपाप्मना अत्रेवसर्वम
र्त्येषुपापचिह्नानिसर्वशः लक्ष्यंतेमुनिशार्दूलैः सविवेकैर्महात्मभिः
अत्रयेबहुरोगार्त्तायेपुत्रधनवर्जिताः येचदुर्लक्षणाक्लिष्टायाचकाश्चि
गतश्रियः वासोन्नपानशय्यनभूषणाभ्यंजनादिभिः हीनाःकुरू
पानिर्विघ्नाधिकांगाःकुभोजनाः येदुर्भगाविनिंघाश्चयेचान्यपर
सेवकाः एतेपूर्वभवेसर्वेसुमहापापकारिणः एवंविमृश्यलोकेस्मिन्

दृष्ट्वापापजनस्थितिं बुधोनकुरुतेपापंयदिकुर्यात्सआत्महा देहोयंमानु
षोर्जितोबहुकैर्मैकभाजनः सदासत्कर्मकुर्वंस्तद्दुष्कर्मसततंस्सजेत् पुण्यकु
स्वार्थंकुर्वंस्तदुःस्वार्थंपापमाचरेत् द्वयोरेकतरंलोकेगृहीत्वानुकुश
लाजनाः इमंमानुषमाश्रित्यदेहंपरमदुर्लभं यआत्मवांस्तुयःकश्चि
द्वयोरेकंसमाश्रयेत् अथपापानिसर्वाणिकुर्वन्नपिसदानरः शि
वमेकंसमाध्यायन्ससंतरतिपातकं यदापूर्वभवेचैषाम्जाताप्राप्ता
यमालयं यैः तदाचितर्कःसुमहानासीद्धर्मसभासदां यद्यपिब्रा २३
ह्मणीचेषासत्कुलाचारदूषिता अतोस्माभिरिहानीतानरकंपातुमानवा

अनयासत्कृतंबाल्यपुण्यलेशोस्तिवानवा तथापिसंविमृश्यैवंधायोदहोस्ति
वानवा बहुजन्मसहस्रेषुकृतपुण्यविपाकतः नृणांब्रह्मकुलेजन्मलभ्यतेहि
कथंचन अतोस्याःपूर्वपूर्वेषुकृतंजन्मसुजन्मसु अन्यथासत्कुलेजन्मकथ
मनस्यपद्यते अत्रैवजन्मन्यनयाकृतमेनोदुरत्ययं तथापिनरकावास
प्रायशोनेहमर्हति किंतुगोवत्सकंहत्वाद्यमृश्यागतसाध्वसा एषाशि
वशिवेत्याहतत्पुण्यंप्रागनेनार्जितं यद्येषापापविच्छित्यैसस्मृत्यपुरुषं
गलं शिवनामवदेद्भुतेयातर्हिगच्छेत्परंपदं एकजन्मकृताघस्यदारुणा
स्यापिपतत्फलं क्रमेणानुभवत्वेषानरकानाचांडालजातिका अस्मादन्यतमः

ब्र. खं. २७

अस्मादन्यतमः कोवानरकोस्तितन्नाम्निइह अनेकक्लेशसंघातैर्यन्मुहुःपरि
पीडनं पुल्कसेऽन्महारौद्रं महाव्याधिविमर्दिता एकैकएवनरकः सर्वेषां
समागताः शंकरपुण्यप्रभावेनयन्नाम विवशाब्रवीत् तेनैषास्मिल्लोके
भूरिपुण्यमंतेकरिष्यति तेनपुण्येनमहतानीस्तीर्याघोरयातनाः नीता
तत्पुरुषरं तेप्रयास्यतिपदंविभोः एतादृशानांमर्त्यानांशास्तारोनव
यं कश्चित् विचार्यस्वयमेवशापदुःखं तत्करोतु सः एवं वैवस्वतपुरस्सर्वैर्य २७
मपुरोगमैः विमृश्यचित्रगुप्ताद्यैरेवमुक्तापतद्भुवि आदेयदेशाभि
वनामनारीप्रमादतावाथसतीऽगात् तेनहास्यः कुरुतेनशंभोर्बिल्व।

कुराराधनपुण्याप श्रीगोकर्णेशिवतिथौ उपोष्यशिवमस्तके रुत्वाजागर
णं चैषान्वकेऽरण्यस्थं बिल्वार्पणंनिशि अकामतः कृतस्यायंपुण्यस्यास्युष्यप
फलं अद्यैवभोक्ष्यतेसेयंपश्यतस्तवनोऽभूपा गौतमउवाच इत्युक्ता
शिवदूतास्तेतस्याश्चांडालयोषितः ङीवलेशंसमाकृष्ययुयुजुर्दिव्यते
जसा तांदिव्यदेहसंक्रांतांतेजोराशिसमुज्वलं विमानेस्थापयामासुः
प्रीतास्तेशिवकिंकराः अथसापरमोदाररूपलक्षणशालिनी दिव्य
भूषणदीप्तांगी दिव्यांबरविराजिनी दिव्यमाल्यावतंसेन ध्विरराजवि
मानगा रत्नछत्रपताकाघैर्गरिःतवादित्रनिःस्वनैः मध्येसाशिवदूता

श्र. खं.
२५
मोदमानावरानना अनुभूतानिजन्मानिस्मृत्वास्मृत्वापुनः अहोईश्वरस्तस्या
यामहात्म्यंविस्मयावहं पत्रमात्रेणसंतुष्टोयोददातिपरंपदं इतिसाजात
निर्वेदास्मरंतीभगवत्पदं दिव्यंविमानमालोक्यतेमहेश्वरकिंकराः आलो
क्यतस्तुरेषुलोकेषुत्रस्तविस्मयं आमंत्र्यमामथोनिन्युः परमेश्वरसंन्निधिं
राजन्नसुमहदाश्चर्यमाख्यातंगिरिजापतेः महात्म्यंभक्तिलेशस्यसर्वाघौ
घविनाशनं राजोवाच भगवन्परमेशस्यकीदृशोलोकउत्तमः यस्य २५
मलक्षणंब्रूहियद्यस्तिमयितेकृपा गौतमः आस्तादिसुरनाथानांको
क्यपिसुदुर्लभः महानंदःसदास्थयत्रसलोकःपरमेशितुः सर्वासि

गमनंयत्रज्योतिरूपंप्रतिष्ठितं कापिनास्तितमोयोगःसलोकःपरमेशितुः
गुणत्रयंसमुत्तीर्यसंप्राप्तायत्रयोगिनः नपतेयुःपुनःसर्वेसलोकःपरमेशि
तुः सर्वेषांनिगमानांचयदेकंक्षेत्रमुच्यते यत्रास्तिपरमंकिंचित्सलोकः
परमेशितुः यत्रवासंनकुर्वंतिक्रोधलोभमदादयः यत्रावस्थानजन्माद्याः
सलोकःपरमेशितुः प्रत्याहारासनध्यानप्राणसंयमनादिभिः यत्रयो
गपथैःप्राप्यंयतंतोयोगिनःसदा यत्रदेवःसदानंदोनिर्मलज्ञानरूपवान्
आस्तेदेव्याःसमंक्रीडन्सलोकःपरमेशितुः अनेकसहस्रेस्तुसंभृतैः
पुण्यकर्मभिः आरूढाःपुरुषानार्योक्रीडंत्सोयत्रसंगताः तेजोराशोस

दालीनादुर्विभाव्यामनोरमे अहोरात्रादिसंख्यानंनविंदंतिकदाचन सलोकःपर
मरास्पदुर्लभोहिकुयोगिनां सतभक्तिसदाकीर्णिस्तैरेवप्रतिपद्यते एतत्क
थाश्रवणाकीर्तनज्ञानहर्षायिसर्वभूतसुहृदश्चशमेकनिष्ठाः संसारमोह
मतिवाह्यनिरस्तभेदास्तेशांकरंपदमवाप्यसुखंरमंते तथात्वमपिराजेंद्र
गोकर्णगिरिशालयं गत्वाप्रशमिताघौघः कृतकृत्यत्वमाप्नुहि तत्रती
र्थेषुसर्वेषुस्नात्वाभ्यर्च्यमहाबलं कृत्वाशिवचतुर्दश्यामुपवासंसमाहित:
कृत्वाजागरणंरात्रौबिल्वैरभ्यर्च्यशंकरं सर्वपापविनिर्मुक्तःशिवलोक
मवाप्स्यसि एषतेविमलोराजन्उपदेशोमयाकृतः स्वस्तितेस्तुगमिष्यामि

मिथिलाधिपतेःपुरीं इत्यामंत्र्यमुनिःश्रीमान्गोतमोमिथिलांययौ सोपि
हृष्टमनाराजागोकर्णंप्रत्यपद्यत तत्रदृष्ट्वामहादेवंस्नात्वाभ्यर्च्यमहाब
लं निर्धूताशेषपापौघोलेभेचपरमंपदं यइमांश्रृणुयात्पुण्यांकथांशै
वीमनोरमां भक्त्यायःश्रावयेद्वापिसयातिपरमांगतिं श्रद्दधानःस
कृद्वापिय इमांश्रावयेत्कथां त्रिःसप्तकुलजैःसार्द्धंशिवलोकमवाप्नुयात्
इतिकथितमशेषश्रेयसामादिबीजंभगवतदुरितघ्नंध्वस्तमोहांधकारं चरित
ममरगेयंमन्मथारेरुदारंसततमपिनिषेव्यंस्वस्तिमानस्तुलोकः इतिश्री
स्कंदपुराणेब्रह्मोत्तरखंडेशिवरात्रिमहात्म्यकथनंनामतृतीयोध्यायः ३

ब्र॰ खं सूतउवाच अथोपिशिवमाहात्म्यंवक्ष्यामिपरमाद्भुतं शृण्वतांसर्वपापघ्नं
२७ भवपाशविनाशनं दुस्तारदुरितांभोधौमज्जतांविषयात्मनां शिवपूजामृ
तेकश्चित्परोनास्तिहितारकः शिवपूजांसदाकुर्याद्बुद्धिमानिहमानवः
अशक्तश्चेत्कृतांपूजांपश्येद्भक्तिविनम्रधीः अश्रद्धयापियःकश्चित्कुर्यात्पू
जांविमुक्तिदां पश्येद्वासोपिकालेनप्रयातिपरमंपदं आसीत्किरातदेशे
षुराजानाम्नाविमर्षणः शूरःपरमदुर्धर्षोजितशत्रुःप्रतापवान् सर्व
दामृगयासक्तःअपत्योनिर्घृणोबली सर्वमांसाशनःक्रूरःसर्ववर्णांग २७
नारतः तथापिकुरुतेपूजांशंभोर्नित्यमतंद्रितः चतुर्दश्यांविशेषेणप

क्षयोःसितकृष्णयोः महाविभवसंपन्नांपूजांकृत्वासमोदते हर्षेणमत्ता
युक्तोनृत्यतिस्तौतिगायति तस्यैवंवर्त्तमानस्यनृपतेःसर्वभक्षिणः दुराचा
रस्यमहिषीचेष्टितेनान्वपद्यत सावैकुमुद्वतीनामराज्ञीशीलगुणान्विता
एकदापतिमालोक्यरहसीदमपृच्छत अहोतेचरितंराजन्महाश्चर्यस्यका
रणं कृतेमहान्दुराचारःकथंभक्तिःपरमेश्वरे सर्वदासर्वभक्षस्त्वंसर्वस्त्री
रतिलालसः सर्वहिंसारतःक्रूरःकथंभक्तिःस्तवेश्वरे इतिपृष्टःसभू
पालोविस्मयरूपिणंतदौतः कृत्वापूजांविहस्यैनामुवाचसकुतूहलात्
॥ विमर्षणउवाच अहंपूर्वभवेकश्चित्सारमेयोवरानने पंपानग
रमाश्रित्यपर्यटामिसमंततः एवंकालेषुगच्छत्सुतत्रैवनगरोत्तमे कदाचित्

श्रं· खं· हागतः सोहंमनोज्ञंशिवमंदिरं प्रत्नायांवर्त्तमानायाचतुर्दश्यामहातिथौ
२८ अपश्यमुत्सवंदूरंबहिर्द्वारंसमाश्रितः तथाहंपरमक्रुद्धैर्दंडहस्तैःपलायितः
तस्माद्देशादपक्रांतः प्राणरक्षापरायणः ततः प्रदक्षिणीकृत्यतद्देवशिव
मंदिरं बलिपिंडाशालोसेनद्वारदेशमुपागतः एवंपुनःपुनस्तत्रकृत्वा
कृत्वाप्रदक्षिणं द्वारदेशेसमासीनंनिघ्नुर्जनैर्निशितैःशरैः सविद्धमात्रः
सहसाशिवद्वारिगतासवः जातोस्म्यहंकुक्कुरराज्ञाप्रभावाच्छिवसंन्नि श्री
लाक
धेः दृष्टाचतुर्दशीपूजांदीपमालाविलोकिता तेनपुण्येनमहताराजकीरका २८
होस्मिभामिनि प्राग्जन्मवासनायोगात्सर्वभक्षोस्मिनिर्घृणः विद्
षामपिदुर्लंघ्याप्रकृतिर्वासनामपी अतोहमपयामीशंचतुर्दश्यांजगद्गुरुम्

तमपिश्रद्धयाभक्त्याभद्रेदेवंपिनाकिनं राजपुवाच त्रिकालज्ञोसिराजेंद्रप्रं
सादाद्गिरिजापतेः मत्पूर्वचरितंहिवक्तुमर्हसितत्वतः राजोवाच त्वं
पूर्वभवेकाचित्कपोतीव्योमचारिणी क्वापिलब्धवतीकिंचिन्मांसखंडंयद
च्छया अंतर्गृध्रमथायांतंमांसपिंडजिघृक्षया दृष्ट्वाश्रीशैलमासाद्य
श्रांतातत्रशिवालयं प्रदक्षिणंपरिक्रम्यध्वजाग्रेसमुपस्थिता अथा
नुधवनरसातीक्ष्णतुंडोविहंगमः त्वांनिहत्यनिपात्याधोमांसमादाय
जग्मिवान् प्रदक्षिणप्रक्रमणाद्देवदेवस्यशूलिनः तस्याग्रेमरणाच्चैवजा
तासीहनृपांगना इत्युवाच श्रुतंसर्वंविशेषेणप्राग्जन्मचरितंमया श्रु
तंचमहदाश्चर्यंभक्तिश्चममचेतसि अथान्यत्प्रष्टुमिच्छामित्रिकालज्ञमहीपते

श्री स्वं इदंशरीरमुत्सृज्ययास्यामःकांगतिंपुनः राजोवाच अतोभवेजन्मनिषष्ठेहंद्वि
२९ तीयेसैंधवोनृपः सिंधुराजसुतात्वंहि मामेवंप्रतिपत्स्यसे तृतीयेस्मिन्दक्ष
देराजासौराष्ट्रेभविताम्यहं कलिंगराजतनयात्वंवैपत्नीभविष्यसि च
तुर्थेहंभविष्यामिभवेगांधाराधिपः मागधीराजतनयात्वमेवममम
मवल्लभा पंचमेवंतिनाथोहंभविष्यामिभवांतरे दाशार्हराजतनया
त्वमेवममवल्लभा अस्माज्जन्मनिषष्ठेहमावर्तेभविता नृपः ययातिकां
जाकन्याभूत्वामामेवयास्यसि पांड्यराजकुमाराहंसप्तमेभविताम्य २९
ने तत्रमत्सदृशोनान्योरूपौदार्यगुणान्वितः सर्वशास्त्रार्थतत्त्वज्ञोबल
वान्दृढविक्रमः सर्वलक्षणसंपन्नः सर्वलोकमनोरमः पद्मपत्र

इतिख्यातोपद्मपत्रमिवद्युतिः भाविताव्वंचवैदेहीरूपेणाप्रतिमाभुवि ना
म्नावसुमतीख्यातारूपावयवशोभिनी सर्वराजकुमाराणांमनोनयन
नंदिनी सात्वंस्वयंवरेसर्वान् विहायनृपनंदनान् वरंप्राप्स्यसिमामेव
दमयंतीवनैषधम् सोहंजित्वानृपान्सर्वान्विवाह्यवरवर्णिनीम्
स्वराष्ट्रसुखाखिलान्भोगान्भोक्ष्येवर्षगणान्बहून्. इष्ट्वाचविविधै
र्यज्ञैर्वाजिमेधादिभिःशुभैः संतर्प्यपितृदेवर्षीन् दानैश्चद्विजसत्तमा
न् संपूज्यदेवदेवेशंशंकरंलोकशंकरम् पुत्रेराज्यधुरंन्यस्यगंतास्
स्मितपसेवनम्. तत्रागस्त्यात्मुनिवरात् ब्रह्मज्ञानमवाप्यच

ब्र॰ खं॰ त्वयासह गमिष्यामि शिवस्य परमं पदम् चतुर्दश्यां चतुर्दश्यामेवं संपूज्य
३० शंकरम् सप्तजन्म निराज्यत्वं गमिष्यामि वरानने इत्येतत्सुकृतं लब्धं
पूजादर्शनमात्रतः कसारमेयो दुष्टात्मा कीदृशी वतसद्गतिः सूतउ
वाच इत्युक्ता निजनाथेन सा राज्ञी शुभलक्षणा परं विस्मयमापन्ना
पूजयामास तं मुदा सोपि राजा तया सार्द्धं भुक्त्वा भोगान्यथेप्सितान्
जगाम सप्तजन्मांते शंभोस्तत्परमं पदम् इति श्रीस्कंदपुराणे ३०
ब्रह्मोत्तरखंडे सितलक्ष्म चतुर्दशीमाहात्म्यं नाम चतुर्थोध्यायः छ
श्रीः छ श्रीसांबसदाशिवार्पणमस्तु छ श्रीः छ

सूतउवाच शिवो गुरुः शिवो देवः शिवो बंधुः शरीरिणां शिव आत्मा शिवो जीवः
शिवादन्यं न विद्यते शिवमुद्दिश्य यत्किंचित्कृतं जप्तं हुतं श्रुतं तदनंतफलं प्रोक्तं
सर्वागमविनिश्चितं भक्त्या निवेदितं शंभोः पत्रं पुष्पं फलं जलं अल्पादल्पतरं
वापि तदनंताय कल्पते विहाय सकलान्धर्मान्सकलागमचोदितान् शि
वमेव भजेद्यस्तु मुच्यते कर्मबंधनात् या प्रीतिरात्मनः पुत्रे या कलत्रे धनेपि वा
कृता चेच्छिवपूजायां सिद्धिमेति किमद्भुतम् तस्मात्केचिन्महात्मानः सक
लाविषयासवान् त्यजंति शिवभक्त्यर्थं स्वदेहमपि दुस्त्यजं सा जिह्वा या शि
वं स्तौति तन्मनो ध्यायते शिवं तौ कर्णौ तत्कथालोलौ तौ हस्तौ यस्य पूजकौ ते नेत्रे
पश्यतः पूजां तच्छिरः प्रणमेच्छिवं यौ तौ पादौ शिवक्षेत्रं भक्त्या पर्यटतः सदा यस्येंद्रि

श्री· स्कं· यस्येंद्रियाणिसर्वाणिवर्त्तंतेशिवकर्मसु ससंतरतिसंसारेभुक्तिंमुक्तिंचविं
३१ दति शिवभक्तियुतोमर्त्यश्चांडालःपुल्कसोपिवा नारीनरोवाषंढोवासद्यो
मुच्येतसंसृतेः किंकुलेनकिमाचारैः किंशीलेनगुणेनवा नारीनरोवाषंढो
भक्तिलेशयुतोमर्त्यःसवंद्यःसर्वदेहिनां उज्जयिन्यामभूद्राजाचंद्रसेनस
माह्वयः जातोमानवरूपेणद्वितीयइववासवः तस्यांलिंगंमहाकालंवसं
तंपरमेश्वरं संपूजयन्नसौभक्त्याचंद्रसेनोनृपोत्तमः तस्याभवत्सखारा
ज्ञःपार्षदःशंकराग्रणीः मणिभद्रोमहाभद्रःसर्वलोकनमस्कृतः तस्यै ३१
कदामहीभर्तुःप्रसन्नःशंकरानुगः चिंतामणिंददौदिव्यंमणिभद्रोमहा
मणिं समणिःकौस्तुभइवद्योतमानोर्कसन्निभः दृष्टःश्रुतोवाध्यातो

वानृणांयच्छतिमंगलं तस्यकांतेरयस्पृष्टंकांस्यंताम्रमयंत्रपु पाषाणादिक
मन्यद्वासद्योभवतिकांचनं सतंचिंतामणिंकंठेबिभ्रद्राजासनंगतः ररा
जराजलोकानांमध्येभानुरिवस्वयं सदाचिंतामणिग्रीवंतंदृष्ट्वाराजसत्तमं
प्रद्दुतपरराजानःसर्वेक्षुब्धहृदोभवन् स्नेहात्किंचिद्याचंतःधार्ष्ट्यात्किंचि
द्दुर्जनाः देवलब्धमजानंतोमणिंमत्सरिणोनृपाः सर्वेषांभूभृतांवांछा
यदाव्यर्थकृतामुना राजानःसर्वदेशानांसंग्रामंचक्रिरेतदा सौराष्ट्राः
केकयाःशाल्वाःकलिंगाःपृथुदेशकाः पंचालावंतिसौवीरामागधामत्स्य
संजयाः एतेचान्येचराजानःसहस्तिरथवाजिनः चंद्रसेनंमृधेहंतुमुद्यमं
चक्रुरोजसा तस्यसेवासुसंरब्धाःशंकितावसुधाधिपाः उज्जयिन्याश्चतुर्द्वारं

श्री· एवं रुद्धा बहुसैनिकाः संरुध्यमानां नगरीं दृष्ट्वा राजभिरुद्धतैः चंद्रसेनो महाका
३२ लं तमेव शरणं ययौ निर्विकल्पो निरातंको स राजा दृढनिश्चयः अर्चयामास
गौरीशं दिनक्तमनन्यधीः एतस्मिन्नेव समये तत्रैव नगरोत्तमे चरंती गो
पिका काचिन्महाकालांतिकं ययौ सा पंचहायनं बालं वहंती गतभर्तृका रा
ज्ञा कृतां महापूजां ददर्श गिरिजापतेः सा दृष्ट्वा सर्वमाश्चर्यं शिवपूजां महो
दयां प्रणिपत्य स्वशिबिरं पुनरेवान्वपद्यत एतत्सर्वमशेषेण सदृष्ट्वा बल्ल
वीसुतः कुतूहलेन विदधे शिवपूजां विमुक्तिकृत् आनीय दृषं पाषाणं ३२
शून्ये तु शिबिरांतिके अनतिदूरे स्वशिबिराच्छिवलिंगमकल्पयत् यानि का
नि च पुष्पाणि हस्तलभ्यानि चात्मनः आनीय स्नाप्य तल्लिंगं पूजयामास भक्तितः

गंधालंकारवासांसि धूपमालाक्षतादिकं विधाय कृत्रिमैर्दिव्यैर्नैवेद्यं चाप्यकल्पयत्
भूयो भूयो समभ्यर्च्य पत्रैः पुष्पैर्मनोरमैः नृत्यं च विविधं कृत्वा प्रणनाम पुनः पुनः
एवं पूजां प्रकुर्वाणा शिवस्यानन्यमानसम् स्वपुत्रं प्रणयाद्गोपी भोजनाय समा
ह्वयत् तयाहूतोपि बहुशः स पूजासक्तमानसः बालोपि भोजनं नैच्छत्तदा मा
ता समाययौ तं विलोक्य शिवस्याग्रे निषण्णं मीलितेक्षणं चकर्ष पाणिं सं
गृह्य कोपेन समताडयत् आकृष्टस्ताडितो वापि नागमत्स सुतो तदा तां पूजां
नाशयामास क्षिप्तं लिंगं च दूरतः हाहेति क्रंदमानं तं निर्भर्त्स्य स्वसुतं तदा
पुनर्विवेश स्वगृहं गोपी रोषसमन्विता मात्रा विनाशितां पूजां देवदेवस्य
शूलिनः देवदेवेति चुक्रोश निपपात स बालकः सनष्टसंज्ञः सहसा बाष्पपू

प्र. खं. रपरिप्लुतः लब्धसंमुहूर्त्तेनचक्षुषीउदमीलयत् ततोमणिस्तंभविराजमानंहिर
३३ ण्मयद्वारकपाटतोरणं महार्हनीलामलवज्रवेदिकं तदेवकांतंशिबिरंमहोदयम्
प्रतप्तहेमकलशैर्बहुभिर्विचित्रंप्रोल्लासितस्फटिकसौधविराजितंच रम्यंवत
शिवपुरंवरपीठमध्येलिंगंचरत्नसहितंसददर्शबालः सदृष्ट्वासहसोत्थाय
भीतोविस्मितमानसः निमग्नइवसंतोत्परमानंदसागरे विज्ञायशिव
पूजायामहात्म्यंतत्प्रभावतः ननामदंडवद्भूमौस्वमातुरघशांतये देवक्षम ३३
स्वदुरितंममातुरुमापते मूढायास्त्वमज्ञानंत्याःप्रसन्नोभवशंकर य
द्यस्तिमयियत्किंचित्पुण्यंत्वद्भक्तिसंभृतं अनेनतवमेमाताशिवकारुण्य
माप्नुयात् इतिप्रसाद्यशिवंशंभुंयाचयःप्रणम्यच सूर्येस्तंगतेकाले

निर्जगामशिवालयात् अथापश्यत्स्वशिबिरंपुरंदरपुरोपमं सद्योहिरण्मयीभूतं
विचित्रविभवोज्वलं सोंतःप्रविश्यभवनंमोदमानोनिशामुखे महामणिगणाकीर्णं
हेमराशिसमुज्वलं ततोपश्यत्स्वजननींस्वपंतीमकुतोभयां महार्हरत्नपर्यंकेसित
शय्यामधिष्ठितां रत्नालंकारदीप्तांगींदिव्यांबरविराजिनी दिव्यलक्षणसंपं
न्नांसाक्षात्सुरवधूमिव जवेनोत्थापयामाससंभ्रमोत्फुल्ललोचनः अंबजागृ
हिभद्रेपश्येदंमहदद्भुतम् इतिप्रबोधितागोपीस्वपुत्रेणमहात्मना ससं
भ्रमंसमासाद्यतत्सर्वंसमुदैक्षत अपूर्वमिवचात्मानमपूर्वमिवबालकम्
अपूर्वमिवभवनंदृष्ट्वासीत्सुखविह्वला श्रुत्वापुत्रमुखात्सर्वंप्रसादंगि
रिजापतेः राज्ञेविज्ञापयामाससयोभजन्निशांशिवं सराजासहसागत्य

अत्यो:

समाप्तनियमोनियमोनिशि ददर्शगोपिकासूनोःप्रभावंशिवतोषणं हिरण्म

३४ यंशिवस्थानंलिंगंमणिमयंतथा गोपवध्वाश्चभवनंमाणिक्यकनकोज्वलम्

दृष्ट्वामहीपतिःसर्वमंत्रीसहपुरोहितः मुहूर्तंविस्मितजनाःपरमानंदनिर्भराः

प्रेम्णाबाष्पजलंमुंचन्परिरेभेतमर्भकं एवंचमत्कृतालोकाश्शिवमाहात्म्य

कीर्तनात् पुराणसंभ्रमाच्चैवसारात्रिःक्षपातामगात् अथप्रभातेउत्थाय

पुरंरुध्वासुसंस्थिताः राजानःश्चारवक्त्रेभ्यःशुश्रुवुःपरमाद्भुतं तेसर्वेवैराः

सहसाराजानश्शंकितापुरं न्यस्तशस्त्राःप्रविविशुःश्रीचंद्रसेनानुमोदिताः ३४

तांप्रविश्यपुरींरम्यांचंद्रसेनंप्रणम्यच तद्गोपवनितागेहमाजग्मुःसर्वभू

भृतः तेतत्रचंद्रसेनेनप्रत्युद्गम्याभिपूजिताः महार्हविष्टराविष्टाःसस

नंदसुविस्मिताः गोपसूनोःप्रसादायप्रादुर्भूतंशिवालयं लिंगंचवीक्ष्यसुप्रीताः

शिवेचक्रुःपरांगतिं तस्मैगोपकुमारायप्रीतास्तेसर्वभूभृतः वासोहिरण्यरत्नानि

गोमहिष्यादिकंधनं गजानश्वान्रथान्रौक्मान्छत्रयानपरिच्छदान् दासा

ग्रामाननेकांश्चददुःशिवकृतार्थिनः येयेसर्वेषुदेशेषुगोपास्तिष्ठंतिसर्वशः

तेषांतमेवराजानंचक्रिरेसर्वपार्थिवाः अथास्मिन्नंतरेसर्वैस्त्रिदशैरनुपूजि

तः प्रादुर्बभूवतेजस्वीहनुमान्वानरेश्वरः तस्याभिगमनाद्देवराजानोजात

संभ्रमाः प्रत्युत्थायनमश्चक्रुर्भक्तिनम्रात्ममूर्तयः तेषांमध्येसमासीनं

पूजितःप्लवगेश्वरः गोपात्मजंसमाश्लिष्यराज्ञोवीक्ष्येदमब्रवीत् सर्वेशृणुत

भद्रंवोराजानोयेचसंगताः शिवपूजामृतेनान्यागतिरस्तिशरीरिणाम्

ब्र॰ खं॰ एषगोपसुतोदिष्ट्याप्रदोषेमंदवासरे अमंत्रेणापिसंपूज्यशिवंशिवमवाप्तवान्
३५ मंदवारेप्रदोषोयंदुर्लभःसर्वदेहिनां तत्रापिदुर्लभस्तस्मिन्कृष्णपक्षेसमागते
एषपुण्यतमोलोकेगोपीनांकीर्तिवर्द्धनः नाम्नाश्रीकरइत्युच्चैर्लोकेख्यातिंगमि
ष्यति सूतः एवमुक्त्वांजनीसूनुस्तस्मैगोपकसूनवे उपदिश्यशिवाचारं
तत्रैवादर्शनंगतः तेचसर्वेमहीपालाः संहृष्टप्रतिपूजिताः चंद्रसेनंसमामंत्र्य
प्रतिजग्मुर्यथागतं श्रीकरोपिमहातेजाउपदिष्टोहनूमता ब्राह्मणैःसहधर्मज्ञैः
चक्रेशंभोःसमर्हणं कालेनश्रीकरःसोपिचंद्रसेनश्चभूपतिः समाराध्यशिवंभ ३५
क्त्याप्रापतुःपरमंपदं इदंपवित्रंपरमंरहस्यंयरास्कंस्वस्तिकरंवरिष्ठं आख्या
नमाख्यातमघौघनाशनंगौरीपादांबुजभक्तिवर्द्धनम् इतिश्रीस्कंदपुरा
णेब्रह्मोत्तरखंडेप्रदोषमहिमानुवर्णनंनामपंचमोध्यायः ५ श्रीः

ऋषयऊचुः यदुक्तंभवतासूतमहदाख्यानमुत्तमं शंभोर्माहात्म्यकथनमशेषाघहरंपरम्
भूयोपिश्रोतुमिच्छामस्तदेवसुसमाहिताः प्रदोषेभगवाञ्छंभुःपूजितस्तुमहात्मभिः संप्रयच्छ
तिकांसिद्धिमेतन्नोब्रूहिकेशव श्रुतमप्यसकृत्सूततच्छ्रुतस्तृष्णाप्रजायते सूतउवाच
साधुसाधुमहाप्राज्ञैर्भवद्भिर्लोकपूजितैः यत्रपूज्योमहादेवोनान्योदेवःफलार्थिभिः
प्रदोषपूजामाहात्म्यंकोनुवर्णयितुंक्षमः यत्रसर्वेपिविबुधास्तिष्ठंतिगिरिशांतिके प्रदो
षसमयेदेवःकैलासरजताचले करोतिनृत्यंविबुधैरभिष्टुतगुणोदयः अथपूजाजपोहो
मस्तत्कथातद्गुणस्तवः कर्तव्योनियतंमर्त्यैश्चतुर्वर्गफलेप्सुभिः दारिद्र्यतिमिरांधानां
मिदंहिपरमांजनं कृपासागरमग्नानांस्तवोयंपारदर्शनः दुःखशोकभयार्तानांक्लेशनिर्वा
णकारणं प्रदोषेपार्वतीशस्यपूजनंमंगलायनं दुर्बुद्धिरपिनीचोपिमंदभाग्योजडोपिवा

प्र॰ खं प्रदोषेपूज्यदेवेशंविपद्भ्यःससमुच्यते शत्रुभिर्हन्यमानोपिदष्टमानोपिपन्नगैः शैलैरा
३६ क्रम्यमाणोपिपतन्नपिमहांबुधौ अविद्धःकालदंडोपिनानारोगगतोपिवा नविनश्यतिमर्त्यो
सौप्रदोषेगिरिशार्चनात् दारिद्र्यंमरणंदुःखंऋणभारंनगोपमं सद्योविधूयसंपद्भिर्यु
ज्यतेशिवपूजनात् अत्रवक्ष्येमहापुण्यमितिहासंपुरातनं यच्छ्रुत्वामनुजाःसर्वेप्रयांति
कृतकृत्यतां आसीद्विदर्भविषयेनाम्नासत्यरथोनृपः सर्वधर्मरतोधीरःसुशीलःसत्य
संगरः तस्यपालयतःक्षोणींधर्मेणमुनिपुंगवाः व्यतीयायमहान्कालःसुखेनैवमहीप
तेः अथतस्यमहीभर्तुःशात्रवोबहुभूभुजः बभूवुरुद्धतबलाद्दुर्धर्षणपुरोगमाः कदा श्रीः
चिदथतेशाल्वाःसन्नद्धबहुसैनिकाः विदर्भनगरींतेतुरुरुधुस्तज्जिगीषवः दृष्ट्वासंरु ३६
ध्यमानांतांविदर्भनृपतिःपुरीं योद्धुमभ्याययौतूर्णंबलेनमहतावृतः तस्यतेरभवद्युद्धं
शाल्वैरतिबलोद्धतैः पातालेपन्नगैःसार्द्धंगंधर्वैरिवदुर्मदैः विदर्भनृपतिःसोथकृत्वायुद्धं

सुदारुणं प्रनष्टोबहुभिःशाल्वैःविनष्टोरणमूर्धनि तस्मिन्महारथेवीरेप्रनष्टेमंत्रिभिःसह
दुद्रुवुःसमरेभग्नाहतशेषाश्चसैनिकाः अथयुद्धेनिवृत्तेतुनदत्सुरिपुमंत्रिषु नगर्यांप्रध्व
मानायांजातेकोलाहलेखे तस्यसत्यरथस्यैकाविदर्भनृपतेःसती भूरिशोकसमाविष्टा
कथंचिद्यत्नाद्विनिर्ययौ सानिशासमयेयत्नादंतर्वत्नीनृपांगना निर्गताशोकसंतप्ता
प्राचींदिशमाययौ अथप्रदोषेमार्गेणगच्छंतीशनकैःसती अतीत्यदूरमध्वानंददर्श
विमलंसरः तत्रागत्यवरारोहातप्तातापेनभूयसा विनीतसरसस्तीरेछायायांवृक्षमु
पाश्रयत् तत्रदैववशाद्राज्ञी(प्रसोतैर्योवाभ्यसा)विजनेतरुकुट्टिमे असूततनयंसा
ध्वीमुहूर्तेसद्गुणान्विते अथसाराजमहिषीपिपासार्त्तिहतासकृत् सरोवतीर्णासारा
ज्ञीग्रस्ताग्राहेणभूयसा जातमात्रःकुमारोपिविनष्टपितृमातृकः रुरोदोच्चैःसरसी
रेक्षुत्पिपासार्दितोभृशं तस्मिन्नेवंक्रंदमानेजातमात्रेकुमारके कांचिद्दसायबोशिशुं

ब्र· खं· श्रुत्वाविप्रवरांगनासाथेकृहायनंबालंमुद्वहंतीनिजात्मजं अधुनाभर्त्रारहितायाच्यमाना
३७ गृहेगृहे एकात्मजाबंधुहीनायांच्यामार्गेविशंकगता उमानामद्विजसतीददर्शनृपनंद
नं साद्दष्ट्वाराजतनयंसूर्यबिंबमिवच्युतं अनाथमेनंक्रंदंतंचिंतयामासभ्रशा: अहो
सुमहदाश्चर्यमिदंदृष्टंमयाधुना अछिंननाभिसूत्रोयंशिशुर्माताक्वागता पितानो
स्तिवनान्योस्तिनास्तिबंधुजनोपिवा विप्राजमजोन्नपात्मजोजायतेकथमत्रकः शि
शुमेनंसमुधृत्यपुष्णाम्येनमहंध्रुवं किंतुविज्ञायकुलंप्रोत्सहेप्रष्टुमुत्तमं इतिमी
मांसमानायांतस्यांविप्रवरस्त्रियां कश्चित्समाययौभिक्षुःसाक्षाद्देवःशिवःस्वयम्
तामाहविप्रवर्येथिविप्रमानिनिमाखिद राज्ञोयंबालकःशुभ्रविमरखपहादिसंशयम् ए ३७
तावदुक्त्वात्वरितोभिक्षुःकारुणिकोययौ अथतस्मिन्गतेभिक्षौतत्रसाविप्रमानिनी
एकचक्राह्वयेरम्येग्रामेकृतनिकेतना स्वपुत्रंराजपुत्रंचभिक्षान्नेनव्यवर्ध्दयत्

ब्राह्मणीतनयःसोथसराजतनयस्तथा ब्राह्मणैःकृतसंस्कारौववृधातेसुपूजितौ कृतोपन
यनौकालेब्राह्मणोनियमस्थितौ भिक्षान्नंचेरतुस्तत्रमात्रासहदिनेदिने ताभ्यांकदाचि
द्बालाभ्यांताविप्रवनितासह भैक्ष्यंचरंतीदैवेनप्रविष्टादेवतालयं तत्रदृष्टःसमाकीर्णे
मुनिभिर्देवतालये तौदृष्ट्वाबालकौधीमान्शांडिल्योमुनिरब्रवीत् अहोदैवबलं
चित्रमहोदैवबलंमहत् एषबालोन्यजननीसुतेभैक्ष्येणजीवति इमांमेवद्विजवधूं
मातरंप्राप्यनिर्मलां सहैवद्विजपुत्रेणद्विजभावंसमाश्रितः इतिश्रुत्वामुनेर्वाक्यंशां
डिल्यस्यद्विजन्मनः साप्रणम्यसभामध्येपर्यपृछत्सविस्मया ब्रह्मन्नेषोर्भकोनी
तोमयाभिक्षोर्गिरागृहम् अविज्ञातकुलोद्यापिसुतवत्पर्यपोष्यत कस्मिन्कुलेप्रसू
तोयंकामाताजनकस्यकः सर्वंविज्ञातुमिछामिभवतोज्ञानचक्षुषः इतिपृष्टोमुनिःसो

ब्रह्मोत्तर

३८ थज्ञानदृष्टिर्द्विजस्त्रिया आचख्यौतस्यबालस्यजन्मकर्मचभौतिकं विदर्भराजपुत्रत्वंतत्पितु
:समरेमृतिं तन्मातुर्नक्रग्रहणंसाकल्येनन्यवेदयत् अथसाविस्मितानारीपुनःपप्रच्छ
तंमुनिं सराजासकलान्भोगान्हित्वायुद्धेकथंमृतः दारिद्र्यंकैवबालस्यकथंप्राप्तंमहामु
ने दारिद्र्यंचसमुत्सृज्यकथंराज्यमवाप्स्यति अस्यापिममबालस्यभिक्षान्नेनजीवतः
दारिद्र्यशमनोपायमुपदेष्टुंत्वमर्हसि शांडिल्युवाच अमुष्यबालस्यपितासवि
दर्भमहीपतिः पूर्वजन्मनिपांड्योसौबभूवनृपसत्तमः आसीत्कलकलारावःसर्वत्रनग श्रीशिव.
रेमहान् श्रुत्वातमुत्कलंशब्दंराजासौशिवार्चनः निर्ययौराजभवनेनंनगरक्षोभशंकया ३८
एतस्मिन्नेवसमयेतस्यामात्योमहाबलः गृहीतशत्रुसामंतोराज्ञांतिकमुपागमत्

अमात्येनसमानीतंशत्रुसामंतमुद्धतं दृष्ट्वातुक्रोधनृपतिःशिरःछेदमुपाक्रोत् सतथैवमहीपालो
विसृज्यशिवपूजनं असमाप्तात्मनियमश्चकारानिशिभोजनं तत्पुत्रोपितथाचक्रेप्रदोषसमयेशिवं
अनर्चयित्वामूढात्माभुक्त्वासुष्वापदुर्मदः जन्मांतरेसनृपतिर्विदर्भेनृपतिर्भवत् शिवस्यार्चां
तरायेणपरैर्भोगांतरेहृतः तत्पुत्रोयंपूर्वभवेसोस्मिन्जन्मनितत्कृतः महादारिद्र्यमापन्नःशि
वपूजाव्यतिक्रमात् अस्यमातापूर्वभवेसंपत्नींछद्मनाहनत् तेनपापेनमहताग्राहेणास्मिन्ज
न्मनिहृता एषाप्रारब्धिरेतेषांसर्वेसमुदाहृता अनर्चितशिवायेमर्त्याःप्राप्नुवंतिदारिद्र्यताम् सत्यं
ब्रवीमितवलोकहितंब्रवीमिसारंब्रवीम्युपनिषद्धृदयंब्रवीमि संसारमुल्बणमसारमवाप्यजं
तोःसारोयमीश्वरपदांबुरुहस्यसेवा येनार्चयंतिगिरिशंसमयेप्रदोषेयेचार्चितंशिवपदं
प्रणमंतिचान्ये एतत्कथांश्रुतिपुटैर्नपिबंतिमूढास्तेजन्मजन्मसुभवंतिनरादरिद्राः येवैप्रदोष
समयेपरमेश्वरस्यकुर्वंत्यनन्यमनसोंघ्रिसरोजपूजां नित्यंप्रवृद्धधनधान्यकलत्रपुत्रसौभाग्य
संपदधिकास्तइहैवलोके कैलासशैलशिखरेचिरराजमानेश्रीगौरींनिवेश्यकनकांचितरत्नपीठे

ब्र· खं· नृत्यंविधातुमभिवांछितशूलपाणौदेवाःप्रदोषसमयेऽनुभजंतिसर्वे वाग्देवीधृतवल्लकीश
३९ तमुखोवेणुंदधत्यब्जजस्तालोन्नतकरोरमाभगवतीगेयप्रयोगान्विता विष्णुःसांद्रमृदंग
ळंबनपटुर्देवाःसमंतात्स्थिताःसेवंतेतमनुप्रदोषसमयेदेवंमृडानीपतिं गंधर्वयक्षप
तगोरगसिद्धसाध्यविद्याधरामरवराप्सरसांगणाश्च येन्येत्रिलोकनिलयाःसहभू
तवर्गाःप्रासेप्रदोषसमयेहरपार्श्वसंस्थाः प्रदोषकालेहरएकपूज्यस्त एवपूज्यश्चनान्येहर
पद्मजाद्याः तस्मिन्महेशेविधिनेज्यमानेसर्वेप्रसीदंतिसुराधिनाथाः एषतेतनयःपू
र्वेजन्मनिब्राह्मणोत्तमः प्रतिग्रहैर्वयोनिन्येनदानाद्यैस्तुकर्मभिः अतोदारिद्र्यमापन्नःपुत्र शि·व·
स्तेद्विजजन्मनि तद्दोषपरिहारार्थंशरणंयातुशंकरम् इतिश्रीस्कंदपुराणेब्रह्मोत्त २९
रखंडेप्रदोषमहिमानुवर्णनंनामषष्ठोध्यायः सूतउवाच इत्युक्तामुनिना
साध्वीसाविप्रवनितापुनः तंप्रणम्याथपप्रच्छशिवपूजाविधेःक्रमं शांडिल्यउवाच

पक्षद्वयेत्रयोदश्यांनिराहारोभवेद्दिवा घटित्रयादस्तमयात्पूर्वंस्नानंसमाचरेत्
देवस्यपुरतःसम्यगुपलिप्यनसांभसा विधायमंडपंरम्यंधौतैर्वस्त्रादिभिर्बुधः वि
तानाद्यैरलंकृत्यबाळपल्लवयांकुरैः विचित्रमपममुद्धृत्य वर्णपंचकसंहितं ततो
पविष्टस्तुशुद्धेसोपविष्टस्थिरासने सम्यक्संपादिताशेषपूजोपकरणःशुचिः आ
गमोक्तेनमंत्रेणपीठमामंत्रयेत्सुधीः ततःकृत्वात्मशुद्धिंचभूतशुद्धिमनुक्रमात् प्राणा
यामत्रयंकृत्वाबीजमंत्रैःसबिंदुकैः मातृकान्यासविधिनाध्यात्वोतांदेवतांपरां स
माप्यमातृकांभूयोध्यात्वाचैवपरांशिवं वामभागेगुरुंनत्वादक्षिणेगणपंनमेत् अंसो
रुयुग्मेधर्मादीन्तस्यनाभौचपार्श्वयोः अधर्मादीनंदादीन्हृदिपीठंचविन्यसेत् आ
धारशक्तिमारभ्यज्ञानात्मानमनुक्रमात् उत्क्रमेणविन्यस्य हृत्पद्मेसाधुभावयेत् न
वशक्तिमयेरम्येध्यायेद्देवमुमापतिम् चंद्रकोटिप्रतीकाशंत्रिनेत्रंचंद्रभूषणम् आ
पिंगलजटाजूटरत्नमौलिविराजितम् नीलग्रीवमुदारांगं नानारत्नोपशोभितं वरदाभ

यद्धस्तं च धारिणं स्वपरं शिवं दधानं नागवलयं केयूरांगदमुद्रिकं व्याघ्रचर्मपरीधानं
रत्नसिंहासनास्थितं ध्यात्वा तद्वामभागे च चिंतयेद्गिरिकन्यकाम् भास्वज्जपा
प्रसूनाभामुद्यत्किरणसमप्रभां विद्युत्पुंजनिभां तन्वीं मनोनयननंदिनीं बालेंदु
शंकरां स्निग्धां नीलकुंचितकुंचितां भृंगसंघातरुचिरनीलालकविराजितां मणि
कुंडलविद्योतमुखमंडलविभ्रमां नवकुंकुमपंकांककपोलद्वयदर्पणां मधुरस्मित
विभ्राजदरुणाधरपल्लवां कंबुग्रीवां शिवामुग्धत्कुचपंकजकुड्मलां पाशांकुशाभ
यवरैर्विलसंतीं चतुर्भुजां अनेकरत्नविलसत्कंकणांगदमुद्रिकां त्रिवलीवलयां
हृद्यां हेमकांचीगुणान्वितां दिव्यकल्पाढ्यवनितां मौलीसन्नितांघ्रिसरोरुहां रत्न
सिंहासनारूढां सर्पराजपरिच्छदां एवं ध्यात्वा महादेवं देवीं चरिकन्यकां न्यास
मंत्रेण संपूज्य देहं गंधादिभिः क्रमात् पंचाभिर्व्रभिः कुर्यात्प्रोक्तस्थाने थवाह्यादि
पृथक् पुष्पांजलिं दद्यादिह मूलेन वे हृदा पुनः

स्वयं शिवोऽस्मि त्वां मूलमंत्रेण साधकः ततः संपूजयेद्देवं बाह्यपीठे पुनः क्रमात् संकल्पं
प्रवदेत्तत्र पूजामंत्रेण संस्मरेत्: कृतांजलिपुटो भूत्वा चिंतयन्हृदि शंकरं ऋणपातकदौ
र्भाग्यदारिद्र्यविनिवृत्तये अशेषाघविनाशाय प्रसीद मम शंकर दुःखरोगादिसं
तप्तं संसारभयपीडितं बहुरोगाकुलं दीनं पाहि मां वृषवाहन आगच्छ देवदेवेश
महादेवाभयंकर गृहाण सह पार्वत्या तव पूजां मया कृतां इति संकल्प्य विधिवद्ध
द्यपूजां समाचरेत् गुरून्गणपपार्तिं नैवेद्यकृत्संख्यापसव्ययोः क्षेत्रेशम् ईशकोणे
वह्नौ कोसायनीं न्यसेत् धर्मं ज्ञानं च वैराग्यमैश्वर्यं च नमोंतकैः स्वैरेरग्न्यादिको
दिक्कोणेषु पीठपादमनुक्रमात् आभ्यां च बिंदुसंसर्गाभ्यां मध्ये धर्मादीन्प्रपूजयेत्
गात्ररक्षां चतुर्दिक्षु मध्येनंतसतारकम् सत्वादींस्त्रिगुणांस्तत्तद्रूपान्पीठेषु विन्यसेत्

ब्र॰ खं
४२ वामाद्यानशक्तिवीनवस्वरसुजायजेत् हृद्बीजत्रयाद्येनपीठमंत्रेणार्चयेत् ज्ञागतिः
परमांगैस्तत्पंचभिर्मूर्तिशक्तिभिः त्रिशक्तिमूर्तिभिश्चात्मविद्यद्वयसमान्विते अनंता
द्यैःपरीवाद्यमात्मभिश्चरषादिभिः सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्चतदायुधैः
वृषभक्षेत्रचंडीशोदुर्गाचस्कंदनंदनौ गणेशसैन्यपश्चैवस्वस्वलक्षणलक्षिताः अ
णिमामहिमाचाथगरिमालघिमातथा ईशित्वंचवशित्वंच प्राप्तिःप्राकाम्यमेव
अष्टैश्वर्याणिचाष्टानितेजोरूपाणिकेवलं पंचभिर्ब्रह्मभिःपूर्वहृल्लेखाद्याभिरप्यनु
अंगैरुमाद्यैरिंद्राद्यैःपूज्योक्तामुनिभिःस्तुभैः उमाचंडेश्वरादीस्तुपूजयेदुत्तरादिभिः शिव
एवमावरणैर्युक्तं तेजोरूपंमहाशिवं उमयासहितंदेवमुपचारैःप्रपूजयेत् सुप्रतिष्ठि ४२
तशंखस्थैस्तीर्थैःपंचामृतैरपि अभिषिच्यमहादेवरुद्रसूक्तैःसमाहितः

कल्पयेद्विविधैर्मंत्रैरासनाद्युपचारकान् आसनंकल्पयेत्तत्रस्वागतंविहितांजलिः अथम
ष्टगुणोपेतंपाद्यंशुद्धोदकेनच तेनैवाचमनंदद्यान्मधुपर्कमधूत्तमम् शंखपुनराचम
नंदद्यात्स्नानमंत्रैःप्रकल्पयेत् उपवीतंतथावासोभूषणानिनिवेदयेत् गंधमष्टां
गसंयुक्तंसुपूतंचनिवेदयेत् निवेदयेत्सुगंधीनिमाल्यानिविविधानिच धूपंक्रा
कालागरूत्पन्नंदीपंचविविधंशुभं ततश्चबिल्वमंदारकल्हारंसरसीरुहम् धु
त्तरकरवीरंचद्रोणपुष्पंचमल्लिकां कुशापामार्गतुलसीमाधवीचंपकादिकां हे
हतीपुष्पसाराणियथालब्धानिसाधयेत् अथपायसनैवेद्यंसघृतंसोपदंशकं
मोदकापूपसंयुक्तंशर्करागुडसंयुतं मधुनोक्तंदधियुतंऊकपानसमन्वितं तेनै
ऊरुपादेनोहविषामंत्रभावितः नैवेद्यंसर्वशैवेभ्योदत्वाताम्बूलमुत्तमं दीपंनीराजनंरम्यं

प्र·खं छत्रंदर्पणमुत्तमं समर्पयित्वाविधिवन्मंत्रैर्वैदिकतांत्रिकैः यथाशक्तिः स्वयंनिःस्वो
४२ यथाविभवमर्चयेत् भक्त्यादत्तेनगौरीशः पुष्पमात्रेणतुष्यति स्तवैर्नानाविधैःस्तु
त्वासाष्टांगंप्रणमेद्बुधः ततप्रदक्षिणांकृत्वावृषचंडेश्वरादिकान् पूजांसमा
प्यविधिवत्प्रार्थयेद्गिरिजापतिम् जयदेवजगन्नाथजयशंकरशाश्वत ज
यशर्वमहाध्यक्षजयसर्ववरप्रद जयनित्यनिराधारजयविश्वंभराव्यय जयविश्वे
कवंद्येशजयनागेंद्रभूषण जयगौरीपतेशंभोजयचंद्रार्धशेखर जयकोट्यर्क
संकाशजयानंतगुणाश्रय जयरुद्रविरूपाक्षजयनित्यनिरंजन जयनाथकृपा
सिंधोजयभक्तार्तिभंजन जयदुस्तारसंसारसागरोत्तारणप्रभो प्रसीदमेमा
हाभागस्संसारस्यखिद्यतः सर्वपापक्षयंकृत्वारक्षमांपरमेश्वर महादारिद्र्य ४२
मग्नस्यमाहापापहतोजसः महारोगाभिविष्टस्यमहारोगातुरस्यच ऋणभार

परीतस्यखिद्यमानस्यकर्मभिः ग्रहैःप्रपीड्यमानस्यप्रसीदममशंकर दरिद्रःप्रा
र्थयेद्देवंपूजांतेगिरिजापतिं ब्राह्मणान्भोजयेद्भक्त्यादक्षिणाभिश्चपूजयेत् स
र्वपापक्षयकरीसर्वदारिद्र्यनाशिनी शिवपूजामयाख्यातासर्वाभीष्टफलप्रदा
महापातकसंघातमधिकंचोपपातकं शिवद्रव्यापहरणादन्यत्सर्वंविनाशय
त् ब्रह्महत्यादिदोषाणांपुराणेषुश्रुतिष्वपि प्रायश्चित्तानिदृष्टानिनशिवद्रव्य
हारिणं बहुनात्रकिमुक्तेनश्लोकार्धेनब्रवीम्यहं ब्रह्महत्याशतंवापिशिवपू
जाविनाशयेत् मयाकथितमेतत्तेप्रदोषेशिवपूजनं रहस्यंसर्वभूतानांमत्र
नास्त्येवसंशयः एतामेवपुत्राभ्यामेवंपूजाविधीयतां अतःसंवत्सरादेवप
